# Shri Lalita Pratah Stotrapanchakam

# श्रीललिता प्रातःस्तोत्रपञ्चकम्

## Document Information

Text title : lalitaa paJNchakam.h

File name : lalita5.itx

Category : panchaka, devii, dashamahAvidyA, lalitA, shankarAchArya, devI, suprabhAta

Location : doc_devii

Author : shankarAchArya

Transliterated by : Kapila Shankaran

Proofread by : Sowmya Ramkumar

Latest update : November 3, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीललिता प्रातःस्तोत्रपञ्चकम्

प्रातः स्मरामि ललितावदनारविन्दं बिम्बाधरं पृथुलमौक्तिकशोभिनासम् ।
आकर्णदीर्घनयनं मणिकुण्डलाढ्यं मन्दस्मितं मृगमदोज्ज्वलभालदेशम् ॥ १॥

प्रातर्भजामि ललिताभुजकल्पवल्लीं रत्नाङ्गुलीयलसदङ्गुलिपल्लवाढ्याम् ।
माणिक्यहेमवलयाङ्गदशोभमानां पुण्ड्रेक्षुचापकुसुमेषुसृणीः दधानाम् ॥ २॥

प्रातर्नमामि ललिताचरणारविन्दं भक्तेष्टदाननिरतं भवसिन्धुपोतम् ।
पद्मासनादिसुरनायकपूजनीयं पद्माङ्कुशध्वजसुदर्शनलाञ्छनाढ्यम् ॥ ३॥

प्रातः स्तुवे परशिवां ललितां भवानीं त्रय्यन्तवेद्यविभवां करुणानवद्याम् ।
विश्वस्य सृष्टिविलयस्थितिहेतुभूतां विश्वेश्वरीं निगमवाङ्-मनसातिदूराम् ॥ ४॥

प्रातर्वदामि ललिते तव पुण्यनाम कामेश्वरीति कमलेति महेश्वरीति ।
श्रीशाम्भवीति जगतां जननी परेति वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ ५॥

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झटिति प्रसन्ना विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ॥
६॥

॥ इति श्रीमच्छङ्करभगवतः कृतौ ललिता पञ्चकं सम्पूर्णम् ॥

*Shri Lalita Pratah Stotrapanchakam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*